Ex/Sans/PG/4.4F/95/2018

# Master of Arts Examination, 2018

(2nd Year, 4th Semester)

## SANSKRIT

### Course : XIX / F

## [ Inferential Knowledge ]

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

**सर्वेषामुत्तरं संस्कृतभाषां देवनागरीलिपिं चाश्रित्य प्रदेयम्।**

१। अधोलिखितेषु **चत्वारः** प्रश्नाः समाधेयाः — 5×4=20

(क) पर्वतो वह्निमान् वह्निर्घटवान् — एतादृशसमूहालम्बन-निश्चयनिवर्त्यो वह्निर्घटवान् न वेति संशयो भवति तथा सति पर्वतो वह्निमानित्यनुमितौ वह्निर्घटवान् न वेति संशयस्य पक्षतात्वापत्तिर्भवति तन्निवार्यताम्।

(ख) निर्वह्निः पर्वतो रूपवान् न वेति संशयस्य पर्वतो वह्निमान् इत्यनुमितौ पक्षतात्वं सम्भवति न वेति आलोच्यताम्।

(ग) वह्निर्वह्निमान्स्थले वह्निर्वह्निमान् न वेति संशयनिष्ठप्रतिबध्यतायां पक्षविषयताबहिर्भूतसाध्यविषयताघटितधर्मावच्छिन्नत्वस्याप्रसिद्धिरेवं स्थितौ अत्र पक्षतां निरूपय।

(घ) साध्यवत्तानिश्चयबाधनिश्चयोभयाभावयोः संशययोग्यतात्वं निराक्रियताम्।

(ङ) स्वकारणाधीनतृतीयलिङ्गपरामर्शवलेनानपेक्षितानुमानदर्शना-च्चेति पङक्तिः साधु विशद्यताम्।

[*Turn over*]

२। अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः — 2×5=10

(क) पक्षतानिरूपणस्य कारणम् उल्लिख्यताम्?

(ख) 'पक्षस्य धर्मत्वं धर्मविशेषः' इति जागदीशी। अत्र धर्मविशेषशब्दस्यार्थः परिष्क्रियताम्।

(ग) दीधितिकारेण साध्यसंदेहस्यैव पक्षतात्वं कथमुक्तम् — आलोच्यताम्।

(घ) 'संदेहो हि न विशेषणम्।' वाक्यस्यास्यार्थः कारणसहितो संक्षेपतो विशद्यताम्।

(ङ) न वा उपलक्षणम्? को वा अस्याशयस्तत् परिष्क्रियताम्।

(च) घनगर्जितेन मेघानुमानस्थले पुरुषस्य अनुमित्साविरहेऽपि व्यतिरेकव्यभिचारो यथा न भवति मिश्रमतेन तदुपपाद्यताम्।